सहायक आचार्य प्रतियोगी परीक्षा-2024
(संस्कृत शिक्षा विभाग) परीक्षा तिथि - 12/9/2024

धर्मशास्त्र

पुस्तिका में पृष्ठों की संख्या : 16
Number of Pages in Booklet : 16

पुस्तिका में प्रश्नों की संख्या : 150
No. of Questions in Booklet : 150

**Paper Code : 27**

# PAS-24

**इस प्रश्न-पुस्तिका को तब तक न खोलें जब तक कहा न जाए । Do not open this Question Booklet until you are asked to do so.**

प्रश्न-पुस्तिका संख्या व बारकोड/
**Question Booklet No. & Barcode**

404033

## Sub : Dharmshastra-I
## Paper-I

**समय : 03 घण्टे + 10 मिनट अतिरिक्त***
**Time : 03 Hours + 10 Minutes Extra***

**अधिकतम अंक : 75**
**Maximum Marks : 75**

**प्रश्न-पुस्तिका के पेपर की सील/पॉलिथीन बैग को खोलने पर प्रश्न-पत्र हल करने से पूर्व परीक्षार्थी यह सुनिश्चित कर लें कि :**
- **प्रश्न-पुस्तिका संख्या तथा ओ.एम.आर. उत्तर-पत्रक पर अंकित बारकोड संख्या समान है ।**
- **प्रश्न-पुस्तिका एवं ओ.एम.आर. उत्तर-पत्रक के सभी पृष्ठ व सभी प्रश्न सही मुद्रित हैं । समस्त प्रश्न, जैसा कि ऊपर वर्णित है, उपलब्ध हैं तथा कोई भी पृष्ठ कम नहीं है/ मुद्रण त्रुटि नहीं है ।**

**किसी भी प्रकार की विसंगति या दोषपूर्ण होने पर परीक्षार्थी वीक्षक से दूसरा प्रश्न-पत्र प्राप्त कर लें । यह सुनिश्चित करने की जिम्मेदारी अभ्यर्थी की होगी । परीक्षा प्रारम्भ होने के 5 मिनट पश्चात् ऐसे किसी दावे/आपत्ति पर कोई विचार नहीं किया जायेगा ।**

**On opening the paper seal/polythene bag of the Question Booklet before attempting the question paper, the candidate should ensure that :**
- **Question Booklet Number and Barcode Number of OMR Answer Sheet are same.**
- **All pages & Questions of Question Booklet and OMR Answer Sheet are properly printed. All questions as mentioned above are available and no page is missing/misprinted.**

**If there is any discrepancy/defect, candidate must obtain another Question Booklet from Invigilator. Candidate himself shall be responsible for ensuring this. No claim/objection in this regard will be entertained after five minutes of start of examination.**

### परीक्षार्थियों के लिए निर्देश

1. **प्रत्येक प्रश्न के लिये एक विकल्प भरना अनिवार्य है ।**
2. **सभी** प्रश्नों के अंक समान हैं ।
3. प्रत्येक प्रश्न का मात्र **एक** ही उत्तर दीजिए । एक से अधिक उत्तर देने की दशा में प्रश्न के उत्तर को गलत माना जाएगा ।
4. **OMR** उत्तर-पत्रक इस प्रश्न-पुस्तिका के अन्दर रखा है । जब आपको प्रश्न-पुस्तिका खोलने को कहा जाए, तो उत्तर-पत्रक निकाल कर ध्यान से केवल नीले बॉल पॉइंट पेन से विवरण भरें ।
5. कृपया अपना रोल नम्बर ओ.एम.आर. उत्तर-पत्रक पर सावधानीपूर्वक सही भरें । गलत रोल नम्बर भरने पर परीक्षार्थी स्वयं उत्तरदायी होगा ।
6. प्रत्येक गलत उत्तर के लिए प्रश्न अंक का **1/3** भाग काटा जायेगा । गलत उत्तर से तात्पर्य अशुद्ध उत्तर अथवा किसी भी प्रश्न के एक से अधिक उत्तर से है ।
7. **प्रत्येक प्रश्न के पाँच विकल्प दिये गये हैं, जिन्हें क्रमश: 1, 2, 3, 4, 5 अंकित किया गया है । अभ्यर्थी को सही उत्तर निर्दिष्ट करते हुए उनमें से केवल एक गोले (बबल) को उत्तर-पत्रक पर नीले बॉल पॉइंट पेन से गहरा करना है ।**
8. **यदि आप प्रश्न का उत्तर नहीं देना चाहते हैं तो उत्तर-पत्रक में पाँचवें (5) विकल्प को गहरा करें । यदि पाँच में से कोई भी गोला गहरा नहीं किया जाता है, तो ऐसे प्रश्न के लिये प्रश्न अंक का 1/3 भाग काटा जायेगा ।**
9. * **प्रश्न-पत्र हल करने के उपरांत अभ्यर्थी अनिवार्य रूप से ओ.एम.आर. उत्तर-पत्रक जाँच लें कि समस्त प्रश्नों के लिये एक विकल्प (गोला) भर दिया गया है । इसके लिये ही निर्धारित समय से 10 मिनट का अतिरिक्त समय दिया गया है ।**
10. **यदि अभ्यर्थी 10% से अधिक प्रश्नों में पाँच विकल्पों में से कोई भी विकल्प अंकित नहीं करता है, तो उसको अयोग्य माना जायेगा ।**
11. मोबाइल फोन अथवा अन्य किसी इलेक्ट्रोनिक यंत्र का परीक्षा हॉल में प्रयोग पूर्णतया वर्जित है । यदि किसी अभ्यर्थी के पास ऐसी कोई वर्जित सामग्री मिलती है तो उसके विरुद्ध आयोग द्वारा नियमानुसार कार्यवाही की जायेगी ।

**चेतावनी :** अगर कोई अभ्यर्थी नकल करते पकड़ा जाता है या उसके पास से कोई अनधिकृत सामग्री पाई जाती है, तो उस अभ्यर्थी के विरुद्ध पुलिस में प्राथमिकी दर्ज कराते हुए **राजस्थान सार्वजनिक परीक्षा (भर्ती में अनुचित साधनों की रोकथाम अध्युपाय) अधिनियम, 2022** तथा अन्य प्रभावी कानून एवं आयोग के नियमों-प्रावधानों के तहत कार्यवाही की जाएगी । साथ ही आयोग ऐसे अभ्यर्थी को भविष्य में होने वाली आयोग की समस्त परीक्षाओं से विवर्जित कर सकता है ।

### INSTRUCTIONS FOR CANDIDATES

1. **It is mandatory to fill one option for each question.**
2. **All** questions carry equal marks.
3. Only **one** answer is to be given for each question. If more than one answers are marked, it would be treated as wrong answer.
4. The **OMR** Answer Sheet is inside this Question Booklet. When you are directed to open the Question Booklet, take out the Answer Sheet and fill in the particulars carefully with **Blue Ball Point Pen** only.
5. Please correctly fill your Roll Number in **OMR** Answer Sheet. Candidate will themself be responsible for filling wrong Roll No.
6. **1/3 part of the mark(s) of each question will be deducted for each wrong answer.** A wrong answer means an incorrect answer or more than one answers for any question.
7. **Each question has five options marked as 1, 2, 3, 4, 5. You have to darken only one circle (bubble) indicating the correct answer on the Answer Sheet using BLUE BALL POINT PEN.**
8. **If you are not attempting a question then you have to darken the circle '5'. If none of the five circles is darkened, one third (1/3) part of the marks of question shall be deducted.**
9. * **After solving question paper, candidate must ascertain that he/she has darkened one of the circles (bubbles) for each of the questions. Extra time of 10 minutes beyond scheduled time, is provided for this.**
10. **A candidate who has not darkened any of the five circles in more than 10% questions, shall be disqualified.**
11. Mobile Phone or any other electronic gadget in the examination hall is strictly prohibited. A candidate found with any of such objectionable material with him/her will be strictly dealt as per rules.

**Warning :** If a candidate is found copying or if any unauthorized material is found in his/her possession, F.I.R. would be lodged against him/her in the Police Station and he/she would liable to be prosecuted under **Rajasthan Public Examination (Measures for Prevention of Unfair Means in Recruitment) Act, 2022 & any other laws applicable and Commission's Rules-Regulations.** Commission may also debar him/her permanently from all future examinations.

**उत्तर-पत्रक में दो प्रतियाँ हैं – मूल प्रति और कार्बन प्रति। परीक्षा समाप्ति पर परीक्षा कक्ष छोड़ने से पूर्व परीक्षार्थी उत्तर-पत्रक की दोनों प्रतियाँ वीक्षक को सौंपेंगे, परीक्षार्थी स्वयं कार्बन प्रति अलग नहीं करें । वीक्षक उत्तर-पत्रक की मूल प्रति को अपने पास जमा कर, कार्बन प्रति को मूल प्रति से कट लाइन से मोड़ कर सावधानीपूर्वक अलग कर परीक्षार्थी को सौंपेंगे, जिसे परीक्षार्थी अपने साथ ले जायेंगे । परीक्षार्थी को उत्तर-पत्रक की कार्बन प्रति चयन प्रक्रिया पूर्ण होने तक सुरक्षित रखनी होगी एवं आयोग द्वारा माँगे जाने पर प्रस्तुत करनी होगी ।**

1. गोमूत्रेण केषां पदार्थानां शुद्धिर्विजायते ?
(1) श्रृंगाणाम् (2) यज्ञपात्राणाम्
(3) दारवाणाम् (4) चमसाम्
(5) अनुत्तरित: प्रश्न:

2. श्रोत्रियमरणे आशौचं कतिदिवसात्मकम् ?
(1) द्विरात्रम् (2) त्रिरात्रम्
(3) अहोरात्रम् (4) पक्षिणी
(5) अनुत्तरित: प्रश्न:

3. मन्वनुसारेण कीदृशी स्त्री पतिलोकात् हीयते ?
(1) या भर्तारमतिवर्तते
(2) या यज्ञमतिवर्तते
(3) या व्रतमतिवर्तते
(4) या दानमतिवर्तते
(5) अनुत्तरित: प्रश्न:

4. याज्ञवल्क्यस्मृत्यनुसारेण कस्मात् कस्यां जायमानो पुत्रः 'चाण्डाल' इत्युच्यते ?
(1) क्षत्रियात् ब्राह्मण्याम्
(2) शूद्रात् शूद्रायाम्
(3) ब्राह्मणात् शूद्रायाम्
(4) शूद्रात् ब्राह्मण्याम्
(5) अनुत्तरित: प्रश्न:

5. आचारस्य वर्जनात् केषां मृत्युः प्रभवति ?
(1) वेदशास्त्रविदाम् (2) शस्त्रयुताम्
(3) भययुताम् (4) अनृताम्
(5) अनुत्तरित: प्रश्न:

6. मन्वनुसारेण नित्यशुद्धं किम् ?
(1) ब्रह्मचारिगतं भैक्ष्यम्
(2) पक्षिजग्धम्
(3) गवाघ्रातम्
(4) अवक्षुतम्
(5) अनुत्तरित: प्रश्न:

7. स्नातकस्य कृतकृत्यता कुत्र अस्ति ?
(1) स्वाध्याये (2) गायने
(3) याजने (4) पूजने
(5) अनुत्तरित: प्रश्न:

8. मनुमते नवसस्येष्टिरस्ति –
(1) चातुर्मास्यम् (2) आग्रयणम्
(3) उत्तरायणम् (4) दक्षिणायनम्
(5) अनुत्तरित: प्रश्न:

9. मनुमते सद्यःप्रक्षालकः कः ?
(1) एकाहमात्रजीवनोचितनीवारादिकस्य संचयिकः
(2) एकमासपर्यन्तजीवनोचितनीवारादिकस्य संचयिकः
(3) षण्मासपर्यन्तजीवनोचितनीवारादिकस्य संचयिकः
(4) वर्षपर्यन्तजीवनोचितनीवारादिकस्य संचयिकः
(5) अनुत्तरित: प्रश्न:

10. मनुमते वानप्रस्थी आर्द्रवासः कदा भवेत् ?
(1) ग्रीष्मे (2) वर्षासु
(3) हेमन्ते (4) वसन्ते
(5) अनुत्तरित: प्रश्न:

11. मनुमते वीतशोकभयो विप्रो कुत्र महीयते ?
(1) इहलोके (2) स्वर्गलोके
(3) राजद्वारे (4) ब्रह्मलोके
(5) अनुत्तरित: प्रश्न:

12. "समतां चैव सर्वस्मिन्" कस्य लक्षणम् ?
(1) गृहस्थस्य (2) ब्रह्मचारिणः
(3) वानप्रस्थिनः (4) मुक्तस्य
(5) अनुत्तरित: प्रश्न:

13. मनुमते गृहस्थः अपत्यस्य अपत्यं दृष्ट्वा कुत्र गच्छेत् ?
(1) गृहम् (2) आश्रमम्
(3) वनम् (4) ग्रामम्
(5) अनुत्तरित: प्रश्न:

**14.** याज्ञवल्क्यस्मृत्यनुसारेण धर्मस्य मूलप्रमाणं नास्ति –
(1) स्मृतिः (2) श्रुतिः
(3) सदाचारः (4) प्रायश्चित्तम्
(5) अनुत्तरितः प्रश्नः

**15.** याज्ञवल्क्यस्मृत्यनुसारेण धर्मशास्त्रस्य प्रयोजकाः कतिसंख्यकाः वर्तन्ते ?
(1) विंशतिः (2) द्विसप्ततिः
(3) एकविंशतिः (4) षड्विंशतिः
(5) अनुत्तरितः प्रश्नः

**16.** याज्ञवल्क्यमते मुण्डितपुरुषान् दृश्यमानो भवति –
(1) विनायकेन ग्रस्तः (2) रुग्णः
(3) बुभुक्षुः (4) पिपासुः
(5) अनुत्तरितः प्रश्नः

**17.** यः अथर्वांगिरसोऽधीते सः पितृन् काभ्यां तर्पयति ?
(1) मधुसर्पिभ्याम् (2) घृतसर्पिभ्याम्
(3) मधुमेदाभ्याम् (4) मेदसर्पिभ्याम्
(5) अनुत्तरितः प्रश्नः

**18.** याज्ञवल्क्यानुसारेण क्षत्रियस्य उपनयनं विधीयते –
(i) गर्भास्याष्टमे वर्षे
(ii) जन्मस्यैकादशे वर्षे
(iii) जन्मस्याष्टमे वर्षे
(iv) गर्भस्य–द्वादशे वर्षे
अधोलिखितेषु विकल्पेषु समीचीनमस्ति –
(1) (ii) एवं (iv) उभयः
(2) (i) एवं (ii) उभयः
(3) (iv) केवलम्
(4) (ii) केवलम्
(5) अनुत्तरितः प्रश्नः

**19.** मनुमते ब्राह्मणस्य कृते परमं तपः किं भवति ?
(1) व्याहृतिपूर्वकं धारणा
(2) व्याहृतिपूर्वकं ध्यानम्
(3) व्याहृतिप्रणवपूर्वकं प्राणायामाः
(4) व्याहृतिपूर्वकं प्राणायामाः
(5) अनुत्तरितः प्रश्नः

**20.** याज्ञवल्क्यस्मृत्यनुसारेण मेलनं कुरुत –

| | **सूचि–I** | | **सूचि–II** |
|---|---|---|---|
| (A) | कनिष्ठिकामूलम् | (i) | देवतीर्थम् |
| (B) | तर्जनीमूलम् | (ii) | ब्रह्मतीर्थम् |
| (C) | अङ्गुष्ठमूलम् | (iii) | प्रजापतितीर्थम् |
| (D) | करस्याग्रम् | (iv) | पितृतीर्थम् |

अधोलिखितेषु विकल्पेषु समीचीनमस्ति –

| | (A) | (B) | (C) | (D) |
|---|---|---|---|---|
| (1) | (i) | (ii) | (iv) | (iii) |
| (2) | (iii) | (iv) | (ii) | (i) |
| (3) | (iii) | (i) | (ii) | (iv) |
| (4) | (ii) | (iii) | (iv) | (i) |

(5) अनुत्तरितः प्रश्नः

**21.** ब्राह्मणेन वैश्यकन्यायामुत्पादितो पुत्रः कः ?
(1) मूर्धावसिक्तः (2) निषादः
(3) पारशवः (4) अम्बष्ठः
(5) अनुत्तरितः प्रश्नः

**22.** याज्ञवल्क्यमते कस्मिन् श्राद्धे संभोजनीयाः अयुग्मसंख्यकाः ब्राह्मणाः ?
(1) पार्वणश्राद्धे (2) तीर्थश्राद्धे
(3) एकोदिष्टश्राद्धे (4) आभ्युदियकश्राद्धे
(5) अनुत्तरितः प्रश्नः

**23.** याज्ञवल्क्यमते तात्कालिक–अनध्यायाः सन्ति –
(1) एकविंशतिः (2) त्रयोदशः
(3) एकोनत्रिंशतिः (4) सप्तत्रिंशतिः
(5) अनुत्तरितः प्रश्नः

**24.** या पतिं नाभिचरति सा उच्यते ?
(1) साध्वी (2) पतिप्रिया
(3) व्यभिचारिणी (4) पतिवल्लभा
(5) अनुत्तरितः प्रश्नः

**25.** याज्ञवल्क्यानुसारेण ब्रह्मचारी रात्रौ कस्यां दिशि अभिमुखी भूत्वा मूत्रपुरीषे कुर्यात् ?
(1) पश्चिमामुखः (2) पूर्वामुखः
(3) उदङ्मुखः (4) दक्षिणामुखः
(5) अनुत्तरितः प्रश्नः

26. ब्रह्मचारिणा अग्निकार्यं कदाऽचरणीयम् ?
(1) सन्ध्योपासनानन्तरम्
(2) सन्ध्योपासनपूर्वकम्
(3) सन्ध्योपासनमध्ये
(4) भोजनान्ते
(5) अनुत्तरित: प्रश्न:

27. याज्ञवल्क्योक्तदिशा वेदाध्ययनस्य उत्सर्जनकाल: वर्तते –
(i) पौषमास: (ii) आषाढमास:
(iii) चैत्रमास: (iv) माघमास:
अधोलिखितेषु विकल्पेषु समीचीनं नास्ति –
(1) (ii) एवं (iv) केवलम्
(2) (iv) केवलम्
(3) (i) एवं (iv) केवलम्
(4) (i) केवलम्
(5) अनुत्तरित: प्रश्न:

28. याज्ञवल्क्यस्मृत्यनुसारेण द्विजातिभ्य: पञ्चनखेषु अभक्ष्य: अस्ति –
(1) शल्लका: (2) मार्जार:
(3) कच्छप: (4) सेधा
(5) अनुत्तरित: प्रश्न:

29. याज्ञवल्क्यस्मृत्यनुसारेण गृहस्य शुद्धि: कथं भवति –
(1) दाहात् (2) कालात्
(3) मार्जनलेपनात् (4) सेकात्
(5) अनुत्तरित: प्रश्न:

30. याज्ञवल्क्यस्मृत्यनुसारेण ताम्राणां शुद्धि: कै: भवति ?
(1) भस्मादिभि: (2) मृद्वारिभि:
(3) उष्णवारिभि: (4) क्षारम्लोदकवारिभि:
(5) अनुत्तरित: प्रश्न:

31. को भवति सदा सन्तोषी ?
(1) स्नातक: (2) संन्यासी
(3) वानप्रस्थी (4) गृहस्थी
(5) अनुत्तरित: प्रश्न:

32. याज्ञवल्क्यस्मृत्यनुसारेण उभयतोमुखीं गां दत्वा दाता कीदृशं फलमाप्नोति ?
(1) वत्सस्य गोश्च यावन्ति रोमाणि तावत्सङ्ख्याकानि युगानि स्वर्गमाप्नोति ।
(2) सहस्रवत्सरान् स्वर्गमाप्नोति ।
(3) गो: रोमसम्मितान् रोम-सङ्ख्याकान् वत्सरान् स्वर्गमाप्नोति ।
(4) युगानि स्वर्गमाप्नोति ।
(5) अनुत्तरित: प्रश्न:

33. याज्ञवल्क्यस्मृत्यनुसारेण कीदृशो ब्राह्मण: श्राद्धे निन्दित: ?
(i) पञ्चाग्नि: (ii) अङ्गहीन:
(iii) श्यावदन्तक: (iv) कर्मनिष्ठ:
अधोलिखितेषु विकल्पेषु समीचीनमस्ति –
(1) (ii) एवं (iv) केवलम्
(2) (iv) केवलम्
(3) (ii) एवं (iii) केवलम्
(4) (i) केवलम्
(5) अनुत्तरित: प्रश्न:

34. ब्राह्मणस्योपनयनं कस्मिन् वर्षे करणीयम् ?
(1) गर्भादिकादशे वर्षे (2) गर्भादष्टमे वर्षे
(3) गर्भाद् दशमे वर्षे (4) गर्भाद् द्वादशे वर्षे
(5) अनुत्तरित: प्रश्न:

35. धर्मस्य कति संख्यकानि सन्ति स्थानानि ?
(1) षोडश (2) विंशति:
(3) चतुर्दश (4) द्वाविंशति:
(5) अनुत्तरित: प्रश्न:

36. कथनम् – याज्ञवल्क्यस्मृत्यनुसारेण विद्यातपोभ्यां हीनेन प्रतिग्रह: सुवर्णादि: न ग्राह्य: ।
कारणम् – विद्याविहीन: प्रतिगृहणन् दातारमात्मानं चाधो नरकं नयति ।
अधोलिखितेषु समीचीनं विकल्पं चिनुत –
(1) कथनं सत्यमस्ति कारणमसत्यमस्ति ।
(2) कारणं सत्यमस्ति कथनमसत्यमस्ति ।
(3) कथनकारणे उभौ सत्यमस्ति ।
(4) कथनकारणे उभौ असत्यमस्ति ।
(5) अनुत्तरित: प्रश्न:

**37.** हिरण्यगर्भः कल्पादौ ब्राह्मणान् किमर्थं सृष्टवान् ?

(i) वेदरक्षणार्थम् (ii) पितृणां तृप्त्यर्थम्

(iii) यज्ञाय (iv) अध्यापनाय

अधोलिखितेषु समीचीनं विकल्पं चिनुत –

(1) (i) एवं (iii) (2) (iv) एवं (i)

(3) (iii) एवं (ii) (4) (i) एवं (ii)

(5) अनुत्तरितः प्रश्नः

**38.** याज्ञवल्क्योक्तेषु राज्ञः गुणेषु असम्पृक्तोऽस्ति –

(1) पारुष्यम् (2) कृतज्ञः

(3) विनीतः (4) वृद्धसेवकः

(5) अनुत्तरितः प्रश्नः

**39.** याज्ञवल्क्योक्त 'वार्ता'याम् अपरिगणितमस्ति ____

(1) कृषिः (2) पशुपालनम्

(3) प्रजारक्षणम् (4) वाणिज्यम्

(5) अनुत्तरितः प्रश्नः

**40.** याज्ञवल्क्यस्मृत्यनुसारेण राज्ञा कीदृशः अध्यक्षः नियोजनीयः ?

(i) निष्णातः (ii) कुशलः

(iii) शुचिः (iv) कर्मसु उद्यतः

अधोलिखितेषु विकल्पेषु समीचीनम्अस्ति –

(1) (ii) एवं (iv) केवलम्

(2) (iv) केवलम्

(3) (ii) एवं (iii) केवलम्

(4) (i), (ii), (iii), (iv) केवलम्

(5) अनुत्तरितः प्रश्नः

**41.** याज्ञवल्क्यमते कांस्यलोहयोर्शुद्धिकार्या –

(1) शीतोदकेन (2) उष्णोदकेन

(3) भस्मोदकेन (4) निम्बोदकेन

(5) अनुत्तरितः प्रश्नः

**42.** "गोप्रदानवत्" भवति–

(1) रोगि परिचर्या (2) विप्रार्चनम्

(3) वेदाध्ययनम् (4) कृषिकर्म

(5) अनुत्तरितः प्रश्नः

**43.** याज्ञवल्क्यमते वेतनादानपूर्वकं योऽध्यापयति स भवति –

(1) उपाध्यायः (2) आचार्यः

(3) भृतकाध्यापकः (4) श्रोत्रियः

(5) अनुत्तरितः प्रश्नः

**44.** विभक्तं धनं पुनर्मिश्रीकृते भवति –

(1) अविभाज्यम् (2) विभक्तम्

(3) स्त्रीधनम् (4) संसृष्टधनम्

(5) अनुत्तरितः प्रश्नः

**45.** स्वामिसंबन्धादेव निमित्तादन्यस्य स्वं भवति तदुच्यते ?

(1) दानम् (2) दायः

(3) ऋणम् (4) आधिः

(5) अनुत्तरितः प्रश्नः

**46.** मिताक्षरानुसारेण कात्यायनमते ब्राह्मणासंभवे व्यवहारदर्शने नियोक्तव्यः –

(i) क्षत्रियः (ii) वैश्यः

(iii) शूद्रः (iv) राजपुरुषः

अधोलिखितेषु विकल्पेषु समीचीनमस्ति –

(1) (ii) एवं (iv) उभयः

(2) (ii) एवं (iii) उभयः

(3) (iv) केवलम्

(4) (i) एवं (ii) उभयः

(5) अनुत्तरितः प्रश्नः

**47.** "प्रत्यर्थिनोऽग्रता लेख्यम्" इत्यत्र कः पादः ?

(1) भाषापादः (2) उत्तरपादः

(3) क्रियापादः (4) सिद्धिपादः

(5) अनुत्तरितः प्रश्नः

**48.** याज्ञवल्क्यस्मृत्यनुसारेण कीदृशो लाभः श्रेष्ठः परिकल्पितः ?

(1) हिरण्यलाभः (2) भूमिलाभः

(3) सैन्यलाभः (4) मित्रलाभः

(5) अनुत्तरितः प्रश्नः

49. "सत्यं गृहीतं प्रतिदत्तं प्रतिग्रहेण लब्धम् वा" इत्यत्र कीदृशम् उत्तरम् ?

(1) सत्यम् (2) मिथ्योत्तरम्

(3) प्रत्यवस्कन्दनम् (4) पूर्वन्यायविधिः

(5) अनुत्तरितः प्रश्नः

50. विषशस्त्रादिनिमित्तं प्राणव्यापादनं अस्ति –

(1) स्तेयम् (2) पातकम्

(3) दौर्बल्यम् (4) साहसम्

(5) अनुत्तरितः प्रश्नः

51. दुष्टसाक्षिणः काये विकृतिरस्ति –

(1) ओष्ठपर्यन्तं जिह्वाग्रेण स्पर्शनम्

(2) पूर्वापरविरुद्धभाषणम्

(3) मुखस्य वैवर्ण्यम्

(4) देशाद्देशान्तरगमनम्

(5) अनुत्तरितः प्रश्नः

52. रूपकसंख्याप्रदर्शनेन रक्षणार्थं परस्य हस्ते निहितं द्रव्यमस्ति –

(1) उपनिक्षेपः (2) उपनिधिः

(3) निधिः (4) आधिः

(5) अनुत्तरितः प्रश्नः

53. ये ऋणं गृहीत्वा कान्तारं गच्छन्ति तेभ्यः कति गुणा वृद्धिर्ग्राह्या ?

(1) दशकं शतम् (2) विंशकं शतम्

(3) अष्टशतम् (4) पंचशतम्

(5) अनुत्तरितः प्रश्नः

54. आसेधः कतिविधः ?

(1) द्विविधः (2) चतुर्विधः

(3) पंचविधः (4) षड्विधः

(5) अनुत्तरितः प्रश्नः

55. कीदृशः आधिः न नश्यति ?

(1) कालकृतः (2) द्विगुणीभूतः

(3) फलभोग्यः (4) विस्मृतः

(5) अनुत्तरितः प्रश्नः

56. को नाम असाक्षी ?

(1) ऋजुः (2) अनुलोमजः

(3) प्रतिलोमजः (4) अभिशस्तः

(5) अनुत्तरितः प्रश्नः

57. कः कूटसाक्षिणः दण्डेन दण्ड्यो भवति ?

(1) यः साक्ष्यं विस्मरति

(2) यः साक्ष्यं प्रतिजानाति

(3) यः जानन्नपि साक्ष्यं न ददाति

(4) यः साक्ष्यं विनश्यति

(5) अनुत्तरितः प्रश्नः

58. लेख्यकृतम् ऋणं कैः देयम् ?

(1) त्रिभिः पुरुषैः

(2) चतुर्थादिभिः पुरुषैः

(3) सप्तमादिभिः पुरुषैः

(4) अष्टमादिभिः पुरुषैः

(5) अनुत्तरितः प्रश्नः

59. याज्ञवल्क्यमते विनापि शीर्षकात् कुत्र दिव्यं कार्यम् ?

(1) ऋणादाने

(2) स्तेये

(3) सीमाविवादे

(4) राजद्रोहे

(5) अनुत्तरितः प्रश्नः

60. कथनम् – मिताक्षरायां नारदमते एकादशविधः साक्षी शास्त्रे मनीषिभिः दृष्टः ।

कारणम् – कृतः पञ्चविधो ज्ञेयः षड्विधोऽकृत उच्यते ।

अधोलिखितेषु विकल्पेषु समीचीनमुत्तरं चिनुत –

(1) कथनं सत्यमस्ति, कारणमसत्यमस्ति ।

(2) कारणं सत्यमस्ति, कथनमसत्यमस्ति ।

(3) कथनकारणे असत्यम् स्तः ।

(4) कथनकारणे सत्यम् स्तः ।

(5) अनुत्तरितः प्रश्नः

61. "दुर्गादित्यादीन् पूजयित्वा स्नानोदकमाहृत्य पापयेत्" व्यवस्थेयं कस्मिन् दिव्ये परिलक्ष्यते ?

(1) तुलादिव्ये
(2) कोशदिव्ये
(3) जलदिव्ये
(4) अग्निदिव्ये
(5) अनुत्तरित: प्रश्न:

62. सम्मेलनं कृत्वा सीम्नः लक्षणं देयम् :

| | सूचि–I | | सूचि–II |
|---|---|---|---|
| (A) | वृक्षादिलक्षिता | (i) | नैधानी |
| (B) | स्वाधारजललक्षकत्वात् सलिलवती | (ii) | भयवर्जिता |
| (C) | निखाततुषाङ्गारादिमती | (iii) | ध्वजिनी |
| (D) | अर्थिप्रत्यर्थिपर-स्परसंप्रतिपत्तिनिर्मिता | (iv) | मत्स्यिनी |

| | (A) | (B) | (C) | (D) |
|---|---|---|---|---|
| (1) | (iii) | (iv) | (i) | (ii) |
| (2) | (iii) | (ii) | (i) | (iv) |
| (3) | (i) | (iv) | (iii) | (ii) |
| (4) | (iv) | (iii) | (ii) | (i) |

(5) अनुत्तरित: प्रश्न:

63. याज्ञवल्क्यमते सीमाविषये मर्यादाप्रभेदे कीदृशः दण्डः विहितः ?

(1) मध्यमः
(2) उत्तमः
(3) अधमः
(4) निर्वासनम्
(5) अनुत्तरित: प्रश्न:

64. वैश्यस्य कृते कीदृशं दिव्यं कार्यम् ?

(1) अग्निदिव्यम्
(2) विषदिव्यम्
(3) जलदिव्यम्
(4) तुलादिव्यम्
(5) अनुत्तरित: प्रश्न:

65. श्रौतस्मार्तक्रियासु ग्राह्यः सम्वत्सरः कः ?

(1) सौरः (2) चान्द्रः
(3) सावनः (4) नाक्षत्रः
(5) अनुत्तरित: प्रश्न:

66. सूर्यस्य कस्यां राशौ संक्रमणं "विषुवसंज्ञकं" भवति ?

(1) वृषराशौ
(2) सिंहराशौ
(3) तुलाराशौ
(4) धनुराशौ
(5) अनुत्तरित: प्रश्न:

67. सम्मेलनं कुरुत –

| | (क) | | (ख) |
|---|---|---|---|
| (A) | वृषसंक्रान्तिः | (i) | घृतधेनुदानम् |
| (B) | कर्कसंक्रान्तिः | (ii) | गोदानम् |
| (C) | मकरसंक्रान्तिः | (iii) | भूमिदानम् |
| (D) | मीनसंक्रान्तिः | (iv) | काष्ठदानम् |

| | (A) | (B) | (C) | (D) |
|---|---|---|---|---|
| (1) | (iv) | (iii) | (ii) | (i) |
| (2) | (ii) | (iii) | (iv) | (i) |
| (3) | (ii) | (i) | (iv) | (iii) |
| (4) | (i) | (ii) | (iii) | (iv) |

(5) अनुत्तरित: प्रश्न:

68. धर्मसिन्ध्वनुसारेण निषिद्धकर्मणा सह तिथेर्मेलनं कुरुत –

| | निषिद्धकर्म | | तिथिः |
|---|---|---|---|
| (A) | तैलस्पर्शम् | (i) | रिक्ता |
| (B) | स्त्रीसेवनम् | (ii) | अष्टमी |
| (C) | क्षौरम् | (iii) | पूर्णा |
| (D) | नारिकेलम् | (iv) | सप्तमी |

अधोलिखितेषु समीचीनमस्ति –

| | (A) | (B) | (C) | (D) |
|---|---|---|---|---|
| (1) | (i) | (ii) | (iii) | (iv) |
| (2) | (iv) | (iii) | (i) | (ii) |
| (3) | (iv) | (i) | (ii) | (iii) |
| (4) | (ii) | (i) | (iv) | (iii) |

(5) अनुत्तरित: प्रश्न:

69. धर्मसिन्ध्वनुसारेण विष्णुपदसञ्ज्ञाऽस्ति –

(i) वृषस्य

(ii) सिंहस्य

(iii) वृश्चिकस्य

(iv) कुम्भस्य

अधोलिखितेषु विकल्पेषु समीचीनमस्ति –

(1) (i) केवलम्

(2) (ii) केवलम्

(3) (i) एवं (iii) केवलम्

(4) (i), (ii), (iii), (iv) सर्वेषाम्

(5) अनुत्तरित: प्रश्न:

70. दशमी कति नाडीभिः एकादशीं वेधयति ?

(1) द्वादशनाडीभिः

(2) पंचदशनाडीभिः

(3) अष्टादशनाडीभिः

(4) सप्तदशनाडीभिः

(5) अनुत्तरित: प्रश्न:

71. कयोः तिथ्योः युग्मः नास्ति ?

(1) द्वितीयातृतीययोः

(2) चतुर्थीपंचम्योः

(3) नवमीदशम्योः

(4) षष्ठीसप्तम्योः

(5) अनुत्तरित: प्रश्न:

72. क्षयमासः कस्मिन् मासे भवति ?

(1) आश्विने

(2) कार्तिके

(3) माघे

(4) फाल्गुने

(5) अनुत्तरित: प्रश्न:

73. वैष्णवाः एकादश्यां कीदृशं वेधं वर्जयन्ति ?

(1) अरुणोदयवेधम्

(2) सूर्योदयवेधम्

(3) कपालवेधम्

(4) ग्रस्तवेधम्

(5) अनुत्तरित: प्रश्न:

74. एकादशीव्रते कस्य निषेधो नास्ति ?

(1) पत्रेण दन्तधावनस्य

(2) मैथुनस्य

(3) परान्नभक्षणस्य

(4) मसूरभक्षणस्य

(5) अनुत्तरित: प्रश्न:

75. समुद्रस्नानं कस्मिन् वासरे न करणीयम् ?

(1) सोमवासरे

(2) भौमवासरे

(3) बुधवासरे

(4) गुरुवासरे

(5) अनुत्तरित: प्रश्न:

76. कीदृशी चतुर्थी महापुण्यप्रदा भवति ?

(1) सोमयुता

(2) भौमयुता

(3) भानुयुता

(4) बुधयुता

(5) अनुत्तरित: प्रश्न:

77. कलाकाष्ठादिपरिमितस्वल्पद्वितीयायुक्तापि तृतीया कस्मिन् व्रते निषिद्धा ?

(1) रम्भाव्रते

(2) गौरीव्रते

(3) सूर्यव्रते

(4) स्कन्दव्रते

(5) अनुत्तरित: प्रश्न:

78. सूर्यग्रहणे चूड़ामणियोगः कस्मिन् वासरे भवति ?
(1) सोमवासरे
(2) गुरुवासरे
(3) भृगुवासरे
(4) रविवासरे
(5) अनुत्तरित: प्रश्न:

79. आश्विनकार्तिकयोः चान्द्रऋतुः भवति –
(1) ग्रीष्मः
(2) वर्षा
(3) शरद्
(4) शिशिरः
(5) अनुत्तरित: प्रश्न:

80. सायंसन्ध्यायां मकरसंक्रमे पुण्यकालः कदा ?
(1) परदिने
(2) पूर्वदिने
(3) उभयेद्युः
(4) तस्मिन् रात्रौ
(5) अनुत्तरित: प्रश्न:

81. प्रातर्वेधस्य लक्षणं किम् ?
(1) सूर्यास्तात्प्राक् षड्घटीमिततिथ्यन्तरस्पर्शः
(2) सूर्योदयात्प्राक् षड्घटीमिततिथ्यन्तरस्पर्शः
(3) सूर्योदयोत्तरं षड्घटिकापरिमिततिथ्यन्तरस्पर्शः
(4) सूर्यास्तोत्तरं षड्घटिकापरिमिततिथ्यन्तरस्पर्शः
(5) अनुत्तरित: प्रश्न:

82. दर्शश्राद्धपिण्डपितृयज्ञयोरेकस्मिन्दिने प्राप्तौ केषां कृते व्यतिषङ्गेण अनुष्ठानं प्रतिपादितम् ?
(1) हिरण्यकेशिनाम्
(2) सामगानाम्
(3) बह्वृचानाम्
(4) श्रौताग्निमताम्
(5) अनुत्तरित: प्रश्न:

83. षष्ठीसप्तम्योः कस्य योगे पद्मकयोगः ?
(1) सोमवासरयोगे
(2) बुधवासरयोगे
(3) शुक्रवासरयोगे
(4) रविवासरयोगे
(5) अनुत्तरित: प्रश्न:

84. काम्यश्राद्धं कथं भवति ?
(1) एकोद्दिष्टविधानेन
(2) पार्वणविधानेन
(3) गोष्ठीश्राद्धविधानेन
(4) नैमित्तिकश्राद्धविधानेन
(5) अनुत्तरित: प्रश्न:

85. श्राद्धविवेकानुसारं "पुण्डरीकाक्षः पुनातु" इत्युच्चार्य किं कार्यम् ?
(1) द्रव्यसेकः
(2) संकल्पः
(3) फलकीर्तनम्
(4) उपवेशनम्
(5) अनुत्तरित: प्रश्न:

86. श्राद्धविवेकमते श्राद्धे प्रशस्तकुशासु कस्य ग्रहणं नास्ति ?
(1) स्वयं प्रातरुत्पाटिताः
(2) समूलाग्राः
(3) हरितकृष्णतायुक्ताः
(4) गोकर्णदीर्घाः
(5) अनुत्तरित: प्रश्न:

87. उद्यापनानुक्तौ किं दद्यात् ?
(1) गां सुवर्णं वा
(2) कास्यम् अश्वं वा
(3) ताम्रं वस्त्रं वा
(4) वस्त्रं भूमिं वा
(5) अनुत्तरित: प्रश्न:

88. क्रतुभिः तुल्यानि दिनानि कानि ?

(1) कन्यागते सवितरि षोडशदिनानि

(2) सिंहगते सवितरि षोडशदिनानि

(3) तुलागते सवितरि षोडशदिनानि

(4) मेषगते सवितरि षोडशदिनानि

(5) अनुत्तरितः प्रश्नः

89. श्राद्धविवेकानुसारेण श्राद्धे विहितवस्तु–अलाभे किम् उपादानीयम् ?

(1) निषिद्धानि

(2) विहितानिषिद्धानि

(3) अविहितानिषिद्धानि

(4) विहितनिषिद्धानि

(5) अनुत्तरितः प्रश्नः

90. श्राद्धविवेकानुसारं मातृकाश्राद्धं कदा कर्तव्यम् ?

(1) पूर्वाह्णे

(2) अपराह्णे

(3) मध्याह्ने

(4) प्रातः

(5) अनुत्तरितः प्रश्नः

91. अर्थानर्थयोः ज्ञानं कुत्रापेक्षितमस्ति ?

(1) त्रय्याम्

(2) वार्तायाम्

(3) दण्डनीत्याम्

(4) आन्वीक्षिक्याम्

(5) अनुत्तरितः प्रश्नः

92. कस्मिन् श्राद्धे ब्राह्मणं न परीक्षेत् ?

(1) एकोद्दिष्टश्राद्धे

(2) वृद्धिश्राद्धे

(3) तीर्थश्राद्धे

(4) पार्वणश्राद्धे

(5) अनुत्तरितः प्रश्नः

93. कौटिल्यानुसारेण त्रिषु पुरुषार्थेषु कस्य प्राधान्यम् ?

(1) धर्मस्य

(2) अर्थस्य

(3) कामस्य

(4) धर्मयुक्तकामस्य

(5) अनुत्तरितः प्रश्नः

94. कौटिल्यानुसारेण कथायोगेन राजा किं परीक्षेत् ?

(1) मन्त्रिणां वाग्मित्वं प्रागल्भ्यं च

(2) प्रज्ञां दाक्ष्यं च

(3) शिल्पं क्लेशसहत्वं च

(4) मित्रतां दृढ़भक्तित्वं च

(5) अनुत्तरितः प्रश्नः

95. प्रव्रज्याप्रत्यवसितः प्रज्ञाशौचयुक्तः गूढ़पुरुषः किन्नाम्ना प्रसिद्धः ?

(1) कापटिकः

(2) उदास्थितः

(3) गृहपतिकः

(4) वैदेहकः

(5) अनुत्तरितः प्रश्नः

96. त्यक्तात्मानो ये शूराः हस्तिनं व्यालं वा द्रव्यहेतोः प्रतियोधयेयुः ते के भवन्ति ?

(1) तीक्ष्णाः

(2) रसदाः

(3) मूर्खाः

(4) प्रतिसत्रिणः

(5) अनुत्तरितः प्रश्नः

97. सर्वधर्माणामाश्रयत्वेन कथिता –

(1) दण्डनीतिः

(2) वार्ता

(3) आन्वीक्षिकी

(4) त्रयी

(5) अनुत्तरितः प्रश्नः

98. अमात्यानां संख्याविषये धर्मज्ञानां मतमेलनं करोतु ।

| | सूचि–I | | सूचि–II |
|---|---|---|---|
| (A) | द्वादशामात्याः | (i) | कौटिल्यः |
| (B) | षोडशामात्याः | (ii) | मनुः |
| (C) | विंशत्यमात्याः | (iii) | बृहस्पतिः |
| (D) | यथासामर्थ्यम् | (iv) | औशनसाः |

| | (A) | (B) | (C) | (D) |
|---|---|---|---|---|
| (1) | (iv) | (iii) | (ii) | (i) |
| (2) | (ii) | (iii) | (iv) | (i) |
| (3) | (iii) | (iv) | (i) | (iii) |
| (4) | (i) | (ii) | (iii) | (iv) |

(5) अनुत्तरितः प्रश्नः

99. अमात्यसम्पदोपेतो दूतः किन्नाम्नाऽभिधीयते ?

(1) परिमितार्थः

(2) निसृष्टार्थः

(3) शासनहरः

(4) शत्रुहरः

(5) अनुत्तरितः प्रश्नः

100. अधस्तनेषु निशान्तप्रणिधौ कस्य प्रतिपादनं कृतम् ?

(1) दाररक्षणस्य

(2) पुत्ररक्षणस्य

(3) मित्ररक्षणस्य

(4) राष्ट्ररक्षणस्य

(5) अनुत्तरितः प्रश्नः

101. परीक्षणोऽत्यात्तस्वः कदर्यो व्यसन्याहितव्यवहारः तस्य कः वर्गः ?

(1) भीतवर्गः

(2) कुद्धवर्गः

(3) लुब्धवर्गः

(4) मानिवर्गः

(5) अनुत्तरितः प्रश्नः

102. विनयाधिकरणे सप्तदशोऽध्यायः केन नाम्नाऽभिहितः ?

(1) राजप्रणिधिर्नाम्ना

(2) अवरुद्धवृत्तमवरुद्धे च वृत्तिर्नाम्ना

(3) मन्त्राधिकारो नाम्ना

(4) दूतप्रणिधिर्नाम्ना

(5) अनुत्तरितः प्रश्नः

103. दिवसस्य कस्मिन् भागे राजा पौरजानपदानां कार्याणि पश्येत् ?

(1) दिवसस्य द्वितीये भागे

(2) दिवसस्य तृतीये भागे

(3) दिवसस्य चतुर्थ भागे

(4) दिवसस्य षष्ठे भागे

(5) अनुत्तरितः प्रश्नः

104. राजन्यस्य सावित्री कस्माद् वर्षात् यावत् अपतिता ?

(1) आषोडशाद्

(2) आद्वाविंशाद्वर्षाद्

(3) आचतुर्विंशाद्वर्षाद्

(4) आचतुर्दशवर्षाद्

(5) अनुत्तरितः प्रश्नः

105. क्षत्रियस्य दण्डः कस्य वृक्षस्य भवति ?

(1) बिल्वस्य

(2) पलाशस्य

(3) अश्वत्थस्य

(4) अशोकस्य

(5) अनुत्तरितः प्रश्नः

106. अधस्तनेषु कौटिल्यानुसारं पुत्रश्रेण्यां नायाति ?

(1) बुद्धिमान्

(2) आहार्यबुद्धिः

(3) दुर्बुद्धिः

(4) निश्छलबुद्धिः

(5) अनुत्तरितः प्रश्नः

107. कीदृग् यज्ञः नित्यस्वाध्यायः ?

(1) देवयज्ञः (2) पितृयज्ञः

(3) ब्रह्मयज्ञः (4) भूतयज्ञः

(5) अनुत्तरितः प्रश्नः

108. को नाम निचयः ?

(1) द्रव्यसंग्रहः (2) ज्ञानसंग्रहः

(3) जितेन्द्रियः (4) चक्षुसंयमः

(5) अनुत्तरितः प्रश्नः

109. गुरुणा शिष्यः कथं शास्यः ?

(1) वधेन (2) ताड़नेन

(3) भर्त्सनादिभिः (4) शस्त्रेण

(5) अनुत्तरितः प्रश्नः

110. सोमसंस्थासु अपरिगणितोऽस्ति –

(1) अग्निष्टोमः (2) उक्थ्यः

(3) वाजपेयः (4) आग्रहायणी

(5) अनुत्तरितः प्रश्नः

111. वणिग्भिः पण्यानां विक्रये कृते राज्ञे कतिभागः शुल्को देयः ?

(1) पञ्चाशद्भागः (2) विंशतिभागः

(3) षष्ठभागः (4) अष्टमभागः

(5) अनुत्तरितः प्रश्नः

112. विप्रतिपत्तौ राजा केभ्यः सत्यं ज्ञापयेत् ?

(1) ज्ञानवृद्धेभ्यः (2) सत्यनिष्ठेभ्यः

(3) आमात्येभ्यः (4) त्रैविद्यवृद्धेभ्यः

(5) अनुत्तरितः प्रश्नः

113. समेषामाश्रमाणां मूलत्वेन परिकल्पितः –

(1) ब्रह्मचर्याश्रमः (2) गृहस्थाश्रमः

(3) वानप्रस्थाश्रमः (4) संन्यासाश्रमः

(5) अनुत्तरितः प्रश्नः

114. कतिमासात्मकं गर्भस्खलनं 'पात'नाम्ना अभिधीयते ?

(1) प्रथम (2) द्वितीय

(3) चतुर्थ (4) पंचम

(5) अनुत्तरितः प्रश्नः

115. अग्नौ सक्तिः कस्य प्रायश्चित्तम् ?

(1) ब्रह्महत्यायाः (2) सुरापानस्य

(3) सुवर्णस्तेयस्य (4) गुरुतल्पगस्य

(5) अनुत्तरितः प्रश्नः

116. वराहवधे प्रायश्चित्तार्थं कस्य दानमपेक्षते ?

(1) नीलवृषस्य (2) घृतपूर्णघटस्य

(3) लोहदण्डस्य (4) वस्त्रस्य

(5) अनुत्तरितः प्रश्नः

117. सूर्याभ्युदितो ब्रह्मचारी किं प्रायश्चित्तमाचरेत् ?

(1) अहोरात्रपर्यन्तं नाश्नीयात्

(2) चान्द्रायणव्रतमाचरेत्

(3) गोदानं कुर्यात्

(4) गोमूत्रं पिबेत्

(5) अनुत्तरितः प्रश्नः

118. आक्रोशे कृते ब्राह्मणस्य किं प्रायश्चितम् ?

(1) एकरात्रमनशनम् (2) द्विरात्रमनशनम्

(3) त्रिरात्रमनशनम् (4) पञ्चरात्रमनशनम्

(5) अनुत्तरितः प्रश्नः

119. अधस्तनेषु कस्मिन् विषये अनृतं वक्ष्यमाणः मनुष्यजातं हन्ति ?

(1) भूविषये (2) पशुविषये

(3) यानविषये (4) सुवर्णविषये

(5) अनुत्तरितः प्रश्नः

120. मन्वनुसारं के भवन्ति अन्तःसंज्ञका ?

(1) ज्ञानेन्द्रियाः (2) वृक्षादयः

(3) अन्तःकरणाः (4) स्वेदजाः

(5) अनुत्तरितः प्रश्नः

121. देवानां अहः कः भवति ?

(1) मनुष्याणामेकवर्षम्

(2) मनुष्याणामुत्तरायणम्

(3) मनुष्याणां दक्षिणायनम्

(4) मनुष्याणाम् ऋतुद्वयम्

(5) अनुत्तरितः प्रश्नः

122. मनुस्मृत्यनुसारेण अधोऽङ्कितानां मेलनं कुरुत –

| सूचि–I | सूचि–II |
|---|---|
| (A) ब्राह्मणः | (i) पादः |
| (B) शूद्रः | (ii) उरुः |
| (C) वैश्यः | (iii) बाहुः |
| (D) क्षत्रियः | (iv) मुखम् |

अधोलिखितेषु विकल्पेषु समुचितमुत्तरं चिनुत : –

| | (A) | (B) | (C) | (D) |
|---|---|---|---|---|
| (1) | (i) | (ii) | (iv) | (iii) |
| (2) | (iv) | (i) | (ii) | (iii) |
| (3) | (iii) | (i) | (ii) | (iv) |
| (4) | (ii) | (iii) | (iv) | (i) |

(5) अनुत्तरितः प्रश्नः

123. मनुस्मृत्यनुसारेण एकस्मिन्नहोरात्रे कति मुहूर्ताः भवन्ति ?

(1) त्रिंशतिः (2) विंशतिः

(3) एकोनविंशतिः (4) चत्वारिंशत्

(5) अनुत्तरितः प्रश्नः

124. मन्वनुसारेण सर्वस्यैवास्य सर्गस्य धर्मतः प्रभुः कः स्मृतः ?

(1) ब्राह्मणः (2) क्षत्रियः

(3) वैश्यः (4) राजा

(5) अनुत्तरितः प्रश्नः

125. अधोलिखितानां सम्मेलनं कुरुत –

| सूचि–I | सूचि–II |
|---|---|
| (A) दैविकानां युगसहस्रम् | (i) ब्रह्मणः एकाहम् |
| (B) मनुष्याणां चतुर्युगस्य द्वादशसहस्रम् | (ii) मन्वन्तरम् |
| (C) दैविकयुगस्य एकसप्ततिगुणम् | (iii) मनुष्याणाम् दक्षिणायनम् |
| (D) देवानां रात्रिः | (iv) दैविकं युगम् |

| | (A) | (B) | (C) | (D) |
|---|---|---|---|---|
| (1) | (ii) | (iv) | (i) | (iii) |
| (2) | (i) | (iv) | (ii) | (iii) |
| (3) | (iv) | (i) | (ii) | (iii) |
| (4) | (iii) | (ii) | (i) | (iv) |

(5) अनुत्तरितः प्रश्नः

126. मनुस्मृत्यनुसारेण अधोलिखितयोः मेलनं कुरुत –

| सूचि–I | सूचि–II |
|---|---|
| (A) ब्राह्मणः | (i) प्रजानां रक्षणम् |
| (B) क्षत्रियः | (ii) कुसीदम् |
| (C) वैश्यः | (iii) याजनम् |
| (D) शूद्रः | (iv) शुश्रूषा |

समुचितनुन्तरं चिनतु

| | (A) | (B) | (C) | (D) |
|---|---|---|---|---|
| (1) | (iii) | (i) | (ii) | (iv) |
| (2) | (i) | (iii) | (ii) | (iv) |
| (3) | (iv) | (iii) | (ii) | (i) |
| (4) | (ii) | (iii) | (iv) | (i) |

(5) अनुत्तरितः प्रश्नः

127. शीलं कतिविधम् ?

(1) चतुर्विधम् (2) अष्टविधम्

(3) त्रयोदशविधम् (4) चतुर्दशविधम्

(5) अनुत्तरितः प्रश्नः

**128.** कुरुक्षेत्रं पांचालाश्च किन्नाम्ना अभिधीयते ?

(1) ब्रह्मावर्तनाम्ना (2) ब्रह्मर्षिदेशनाम्ना

(3) मध्यदेशनाम्ना (4) म्लेच्छदेशनाम्ना

(5) अनुत्तरित: प्रश्न:

**129.** हिरण्यमधुसर्पिषां प्राशनं कस्मिन् संस्कारे भवति ?

(1) गर्भाधाने (2) जातकर्मणि

(3) नामकरणे (4) निष्क्रमणे

(5) अनुत्तरित: प्रश्न:

**130.** बलार्थिन: राज्ञ: उपनयनं कदा कुर्यात् ?

(1) पंचमे (2) षष्ठे

(3) सप्तमे (4) अष्टमे

(5) अनुत्तरित: प्रश्न:

**131.** समागमे कृते वैश्यं किं पृष्टव्यम् ?

(1) कुशलम् (2) अनामयम्

(3) आरोग्यम् (4) क्षेमम्

(5) अनुत्तरित: प्रश्न:

**132.** कीदृशेन विवाहेन विवाहितायां जात: पुत्र: एकविंशतिं पुरुषान् पुनाति ?

(1) ब्राह्मविवाहेन (2) देवविवाहेन

(3) आर्षविवाहेन (4) प्राजापत्यविवाहेन

(5) अनुत्तरित: प्रश्न:

**133.** गृहस्थस्य सूना कति संख्यका: ?

(1) त्रय: (2) पंच

(3) सप्त (4) अष्ट

(5) अनुत्तरित: प्रश्न:

**134.** मनुस्मृत्यानुसारेण अधोलिखितयो: सम्यक्सुमेलनं नास्ति –

(1) कृतयुगे – तप:

(2) त्रेतायुगे – ज्ञानम्

(3) द्वापरयुगे – यज्ञ:

(4) कलियुगे – करुणा

(5) अनुत्तरित: प्रश्न:

**135.** मनुस्मृत्यनुसारेण ब्राह्मणस्य केन तीर्थेन आचमनं निषिद्धम् अस्ति ?

(1) ब्रह्म–तीर्थेन (2) प्राजापत्य–तीर्थेन

(3) दैव–तीर्थेन (4) पितृ–तीर्थेन

(5) अनुत्तरित: प्रश्न:

**136.** पिता कस्य मूर्ति: ?

(1) प्रजापते: (2) विष्णो:

(3) ब्राह्मण: (4) पृथिव्या:

(5) अनुत्तरित: प्रश्न:

**137.** विवाहलक्षणायोश्च परस्परं सम्मेलनं कुरुत –

| (क) | (ख) |
|---|---|
| (A) श्रुतशीलवते स्वयं आहूय कन्यादानम् | (i) राक्षसविवाह: |
| (B) यज्ञे तु वितते ऋत्विजे अलंकृत्य कन्यादानम् | (ii) ब्राह्मविवाह: |
| (C) इच्छयाऽन्योन्यसंयोग: कन्याया: वरस्य च | (iii) देवविवाह: |
| (D) हत्वा छित्त्वा गृहात् रुदतीं कन्याहरणम् | (iv) गन्धर्वविवाह: |

| | (A) | (B) | (C) | (D) |
|---|---|---|---|---|
| (1) | (iv) | (iii) | (ii) | (i) |
| (2) | (i) | (ii) | (iii) | (iv) |
| (3) | (iii) | (iv) | (i) | (ii) |
| (4) | (ii) | (iii) | (iv) | (i) |

(5) अनुत्तरित: प्रश्न:

**138.** पञ्चयज्ञानां क्रमं सूचयत ।

(1) अहुतं, हुतं, प्रहुतं, ब्राह्महुतं, प्राशितम्

(2) हुतं, अहुतं, प्रहुतं, प्राशितं, ब्राह्महुतम्

(3) ब्राह्महुतं, हुतं, अहुतं, प्रहुतं, प्राशितम्

(4) प्राशितं, प्रहुतं, हुतं, अहुतं, ब्राह्महुतम्

(5) अनुत्तरित: प्रश्न:

**139.** भिक्षाचरणे "भवति भिक्षां देहि" इति क: वदति ?

(1) ब्राह्मणबालक: (2) शूद्रबालक:

(3) क्षत्रियबालक: (4) वैश्यबालक:

(5) अनुत्तरित: प्रश्न:

140. किन्नाम पितृणां मासिकश्राद्धम् ?

(1) आभ्युदयिकम् (2) त्रिपिण्डिः

(3) अन्वाहार्यम् (4) पार्वणम्

(5) अनुत्तरितः प्रश्नः

141. एकरात्रमेव परगृहे निवसन् ब्राह्मणः कः भवति ?

(1) विप्रः (2) अतिथिः

(3) परकीयः (4) शूद्रः

(5) अनुत्तरितः प्रश्नः

142. आचार्यः कतिसंख्यकेभ्यः उपाध्यायेभ्यः श्रेयान् भवति ?

(1) पञ्चसंख्यकेभ्यः

(2) दशसंख्यकेभ्यः

(3) पञ्चाशत्संख्यकेभ्यः

(4) शतसंख्यकेभ्यः

(5) अनुत्तरितः प्रश्नः

143. स्वाभाविक-ऋतुकाले कतिसंख्यकाः रात्र्यः परिगणिताः ?

(1) दशसंख्यकाः (2) द्वादशसंख्यकाः

(3) पञ्चदशसंख्यकाः (4) षोडशसंख्यकाः

(5) अनुत्तरितः प्रश्नः

144. मनुस्मृत्यनुसारेण मेलनं कुरुत –

| | सूचि–I | | सूचि–II |
|---|---|---|---|
| (A) | उञ्छशिलवृत्तिः | (i) | मृतम् |
| (B) | अयाचितवृत्तिः | (ii) | प्रमृतम् |
| (C) | याचितवृत्तिः | (iii) | ऋतम् |
| (D) | कर्षणवृत्तिः | (iv) | अमृतम् |

अधोलिखितेषु विकल्पेषु समीचीनमुत्तरं चिनुत –

| | (A) | (B) | (C) | (D) |
|---|---|---|---|---|
| (1) | (i) | (ii) | (iv) | (iii) |
| (2) | (iii) | (iv) | (i) | (ii) |
| (3) | (iii) | (i) | (ii) | (iv) |
| (4) | (ii) | (iii) | (iv) | (i) |

(5) अनुत्तरितः प्रश्नः

145. "प्राशितम्" इत्यनेन कस्य ग्रहणं भवति ?

(1) पितृयज्ञस्य (2) ब्रह्मयज्ञस्य

(3) देवयज्ञस्य (4) नृयज्ञस्य

(5) अनुत्तरितः प्रश्नः

146. ब्राह्ममुहूर्तः विद्यते

(1) दिनस्य पश्चिमो यामः

(2) रात्रेः द्वितीयो यामः

(3) रात्रेः पश्चिमो यामः

(4) रात्रेः पूर्वो यामः

(5) अनुत्तरितः प्रश्नः

147. ब्राह्मं तेजः केन प्रशाम्यति ?

(1) प्रतिग्रहेण

(2) नृत्येन

(3) विवाहेन

(4) तर्पणेन

(5) अनुत्तरितः प्रश्नः

148. सर्वाभिसन्धकः हिंस्रः कः ?

(1) बैडालव्रतिकः

(2) बकव्रतिकः

(3) कुम्भीधान्यकः

(4) कुसूलधान्यकः

(5) अनुत्तरितः प्रश्नः

149. मनुस्मृत्यनुसारेण सामध्वनौ श्रूयमाणे सति स्नातकेन कस्य वेदस्याध्ययनं न करणीयम् ?

(i) ऋग्वेदः

(ii) अथर्ववेदः

(iii) सामवेदः

(iv) यजुर्वेदः

अधोलिखितेषु विकल्पेषु समीचीनमस्ति –

(1) (ii) केवलम्

(2) (i) एवं (ii) केवलम्

(3) (i) एवं (iv) केवलम्

(4) (i), (ii), (iii) एवं (iv)

(5) अनुत्तरितः प्रश्नः

150. असिपत्रवनं कस्य नाम अस्ति ?

(1) वनस्य

(2) वृक्षस्य

(3) नरकस्य

(4) व्रतस्य

(5) अनुत्तरितः प्रश्नः

## रफ कार्य के लिए स्थान / SPACE FOR ROUGH WORK